इत्यभ्यच्च कुशान्तरेण त्रिहतं कृत्वा पात्रे पवित्रनिवेशनम्। शन्नो देवीरभीष्टये आपो भवन्तु पीतये शंयोरभिस्रवन्तु नः। इति पात्रे जलदानम्। ॐ यवोऽसि यवयास्मद्द्वेषो यवयारातीरिति यवदानम्।

ॐगन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्व्वभूतानां त्वामिहोपह्वये श्रियम्॥
इति गन्धदानम्॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यौ इति पुष्पदानम्। ॐ या दिव्या आपः पयसा सम्बभूवुर्या अन्तरीक्षा उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्ता न आपः शिवाः शंस्योनाः सुहवा भवन्तु ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एषोऽर्घ्यो नमः। इति हस्तेऽर्घ्यं दत्त्वा अनेनैव पात्रेण संस्रवपवित्रग्रहणं प्रथमपात्रेण संस्रवं पवित्रञ्च गृहीत्वा ब्राह्मणदक्षिणपार्श्वे कुशोपरि उर्द्ध्वमुखपात्रे स्थापनं तदुपरि कुशदानम्। ततः ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतानि गन्धपुष्पधूपदीपवासोयुगमोत्तरीययज्ञोपवीतानि नमः। गन्धादिदानमच्छिद्रमस्तु संकल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। ततः पितृपितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहानां सपत्नीकानां श्राद्धमहं करिष्ये। अनुज्ञापनम्। ॐ कुरुष्वेति ब्राह्मणैरुक्ते। ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च। इति त्रिर्जपेत्। तत ॐ अमुकसगोत्राणां अस्मत्पितृपितामहप्रपितामहानां यथानामशर्म्मणां सपत्नीकानां श्राद्धं युष्मास्वहं करिष्ये। ॐ कुरुष्व श्राद्धकरणानुज्ञानम्। ॐ अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यो यथानामशर्म्मभ्यः सपत्नीकेभ्य इदमासनं स्वधा। ब्राह्मणवामपार्श्वे आसनम्। ॐ पितॄनावाहयिष्ये ॐ आवाहयेत्युक्ते ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नुशत आवह पितॄन् हविषे अत्तवे। ॐ आयान्तु नः पितरः सोम्यासो अग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन् यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्। इत्यावाहनम्। ॐ अपहता असुरा रक्षांसि वेदिषदः। त्रिस्तिलविकिरणम्। ॐ तिलोऽसि सोमदैवत्यो गोसवो देवनिर्म्मितः। प्रत्नमद्भिः पृक्तः स्वधया पितॄन् लोकान् प्रीणाहि नः स्वाहा। तिलदानम्। गन्धपुष्पं हस्ताभ्यां दत्त्वा पितृपात्रमुत्थाप्य या दिव्येति पठित्वा अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एष ते अर्घ्यः स्वधा। एवं पितामहादौ। सपवित्रं पात्रं गृहीत्वा ब्राह्मणवामपार्श्वे दक्षिणाग्रकुशोपरि ॐ पितृभ्यः स्थानमसीति अधोमुखपात्रस्थापनम्। ॐ शुन्धन्तां लोकाः पितृषदनाः पितृषदनमसि। अधोमुखपात्रस्पर्शनम्। ततः अमुकसगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यः एतानि गन्धपुष्पधूपदीपवासोयुगसोत्तरीययज्ञोपवीतानि स्वधा। पितृतीर्थेन गन्धादिदानम्। गन्धादिदानमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ब्राह्मणवाचनम्। एवं मातामहादीनामनुज्ञापनादि कर्म्म। ॐ या दिव्येति भूमिसम्मार्ज्जनम्। ततो घृताक्तमन्नं गृहीत्वा दक्षिणोपवीतं पितृब्राह्मणम्। ॐ अग्नौ करणमहं करिष्ये ॐ कुरुष्वेति तेनोक्ते ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा। आहुतिद्वयं देवब्राह्मणहस्ते दत्त्वा अवशिष्टार्द्धं पिण्डार्थं स्थापयित्वा अपरमर्द्धं पित्रादिपात्रे मातामहादिपात्रे च निःक्षिपेत्। पात्रे अन्नादि निधाय कुशं दत्त्व अधोमुखाभ्यां पाणिभ्यां पात्रं गृहीत्वा। ॐ पृथिवी ते पात्रं द्यौः पिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। पात्राभिमन्त्रणम्। इदं विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांशुले विष्णो हव्य रक्षस्व। इत्यन्नोपर्य्यधोमुखद्विजाङ्गुष्ठनिवेशनम्। ॐ अपहतेति त्रिर्य्यवविकरणम्।

ॐ निहन्मि सर्व्वं यदमेध्यवद्भवेत्
हताश्च सर्व्वेऽसुरदानवा मया।
रक्षांसि यक्षाः सपिशाचसंघा
हता मया यातुधानाश्च सर्व्वे॥
इति सिद्धार्थविकिरणम्॥

ततः ॐ धुरिलोचनसंज्ञकेभ्यो विश्वेभ्यो देवेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं स्वाहा इति वारिकुशाद्यैरन्नसङ्कल्पनम्। ॐ श्राद्धमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततो वामोपवीतेन सव्यञ्जनं सघृतमन्नं पित्रादिपात्रे निधाय तदुपरि भूमिसंलग्नकुशं दत्त्वा ॐ पृथिवी ते पात्रं अभिमन्त्रणम्। उत्तानाभ्यां पाणिभ्यां पात्रं गृहीत्वा ॐ इदं विष्णुरित्यन्नोपरि उत्तानाङ्गुष्ठं निवेशयेत् ॐ अपहता इति तिलविकिरणम्। भूमिपातितवामजानुः। अमुकगोत्रेभ्यः अस्मत्पितृपितामहप्रपितामहेभ्य अमुकामुकशर्म्मभ्यः सपत्नीकेभ्य एतदन्नं सघृतं सपानीयं सव्यञ्जनं प्रतिषिद्धवर्ज्जितं स्वधा। अन्नसङ्कल्पः। ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। दक्षिणामुखवारित्यागः। ॐ अन्नमिदमच्छिद्रमस्तु सङ्कल्पसिद्धिरस्तु। ततः सव्याहृतिकया गायत्र्या विसर्ज्जयित्वा मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसो मधुमत् पार्थिवं रजः मधु द्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्य्यो माध्वीर्गावो भवन्तु नः॥ मधु मधु मधु इति जपः। यथा सुखं वाग्यता जुषध्वमिति ब्रूयात्। भुञ्जत्सु सप्तव्याधादिकं पितृस्तोत्रं जपेत्।

ॐ सप्तव्याधा दशार्णेषु मृगाः कालाञ्जरे गिरौ।
चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे॥
तेऽपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः।
प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदत॥

ततस्तृप्तेषु। दक्षिणामुखो वामोपवीती उच्छिष्टाग्रतः।

ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम।
भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥

इति भूमौ कुशोपरि सघृतमन्नं जलप्लुतं विकिरेत्। ततो देवब्राह्मणक्रमेण जलगण्डूषं दत्त्वा पूर्व्ववत् पुनः सव्याहृतिकां सावित्रीं मधुवातेत्यृचं मधु मध्विति च जप्त्वा ॐ रुचितं भवद्भिरिति देवब्राह्मणप्रश्नः। सुरुचितमिति तेनोक्ते ॐ शेषमन्नमप्यस्तीति प्रश्नः। इष्टैः सह भुज्यतामिति तेनोक्ते पित्रादिब्राह्मणे वामोपवीतेन ॐ तृप्ताःस्थ इति प्रश्नः। ॐ तृप्ताःस्म इत्युक्ते शेषमन्नेति प्रश्नः। ॐ इष्टैः सह भुज्यतामिति तेनोक्ते मातामहादिब्राह्मणे तथैव प्रश्नः। ततः पित्रादिब्राह्मणे पिण्डानहं पातयिष्ये पातयेत्युक्ते। तदुच्छिष्टाग्रतोऽभ्युक्षणं मण्डलञ्च चतुष्कोणं तिलविकिरणं ॐ अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एतत्ते पिण्डासनं स्वधा इत्यं रेखामध्ये पितामहाय प्रपितामहाय च। सव्याहृतिकां गायत्रीं मधुवातेति त्रिर्जपन् अन्नं साज्यं पिण्डं कृत्वा कुशोपरि अमुकगोत्रास्मत्पितः अमुकशर्म्मन् सपत्नीक एष ते पिण्डः ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। एवं पितामहप्रपितामहमातामहप्रमातामहवृद्धप्रमातामहेभ्यः। पिण्डशेषविकिरणं पिण्डान्तिके। ॐ लेपभुजः प्रीयन्तां इति स्तरणकुशेषु हस्तमार्ज्जनम्। प्रक्षालितेन पिण्डपात्रोदकेन अमुकगोत्र अस्मत्पितः अमुकशर्म्मन् सपत्नीक एतत्ते जलमवनेनिक्ष्व ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधेति पितृपिण्डसेचनम्। पिण्डपात्रमधोमुखं कृत्वा बद्धाञ्जलिः ॐ अत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति जपः। अपः स्पृष्ट्वा वामेन परावृत्य उदङ्मुखश्च प्राणांस्त्रिः संयम्य।

ॐ वसन्ताय नमस्तुभ्यं ग्रीष्माय च नमो नमः।
वर्षाभ्यश्च शरत्संज्ञ ऋतवे च नमः सदा॥
हेमन्ताय नमस्तुभ्यं नमस्ते शिशिराय च।
माससंवत्सरेभ्यश्च दिवसेभ्यो नमो नमः॥

ॐ षड्भ्य ऋतुभ्यो नमः पितृभ्यो नमः। इति जपः। वामेनैव परावृत्य दक्षिणामुखः अमी मदन्त पितरो यथाभागमावृषायिषत। इति जपः। वासः शिथिलीकृत्याञ्जलिं कृत्वा ॐ नमो वः पितरः पितरो नमो वः। इति जपः। गृहान्नः पितरो दत्त। इति गृहवीक्षणम्। ॐ सदो वः पितरो देष्म। इति पिण्डवीक्षणम्। ॐ एतद्वः पितरो वासः इत्युच्चार्य्य अमुकगोत्र इत्यादिना एतत्ते वासः ॐ ये चात्र त्वामनु यांश्च त्वमनु तस्मै ते स्वधा। दशाभवसूत्रदानम्। वामेन पाणिना उदकपात्रं गृहीत्वा। ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पय